## ॥ द्वितीयोऽध्यायः ॥

। ध्यानम् ।
ॐ अक्षस्रक्परशू गदेषु कुलिशं पद्मं धनुः कुण्डिकां
दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् ।
शूलं पाश सुदर्शने च दधतीं हस्तैः प्रसन्नाननां
सेवे सैरिभ मर्दिनी मिह महालक्ष्मीं सरोज स्थिताम् ॥
ॐ ह्रीं ऋषिरुवाच ॥ १॥

देवासुर मभूद्युद्धं पूर्णमब्दशतं पुरा ।
महिषेऽसुराणा मधिपे देवानां च पुरन्दरे ॥ २॥

तत्रासुरै र्महावीर्यै र्देवसैन्यं पराजितम् ।
जित्वा च सकलान् देवान् इन्द्रोऽभून् महिषासुरः ॥ ३॥

ततः पराजिता देवाः पद्मयोनिं प्रजापतिम् ।
पुरस्कृत्य गतास्तत्र यत्रेश गरुड ध्वजौ ॥ ४॥

यथावृत्तं तयोस्तद्वन् महिषासुर चेष्टितम् ।
त्रिदशाः कथयामासुर् देवाभि भव विस्तरम् ॥ ५॥

सूर्येन्द्राग्न्य निलेन्दूनां यमस्य वरुणस्य च ।
अन्येषां चाधिकारान्स स्वयमे वाधितिष्ठति ॥ ६॥

स्वर्गा न्निराकृताः सर्वे तेन देवगणा भुवि ।

विचरन्ति यथा मर्त्या महिषेण दुरात्मना ॥ ७॥

एतद्वः कथितं सर्व ममरारि विचेष्टितम् ।
शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिन्त्यताम् ॥ ८॥

इत्थं निशम्य देवानां वचांसि मधुसूदनः ।
चकार कोपं शम्भुश्च भ्रुकुटी कुटिलाननौ ॥ ९॥

ततोऽतिकोप पूर्णस्य चक्रिणो वदनात्ततः ।
निश्चक्राम महत्तेजो ब्रह्मणः शङ्करस्य च ॥ १०॥

अन्येषां चैव देवानां शक्रादीनां शरीरतः ।
निर्गतं सुमहत्तेजस् तच्चैक्यं समगच्छत ॥ ११॥

अतीव तेजसः कूटं ज्वलन्त मिव पर्वतम् ।
ददृशुस्ते सुरास्तत्र ज्वाला व्याप्त दिगन्तरम् ॥ १२॥

अतुलं तत्र तत्तेजः सर्वदेव शरीरजम् ।
एकस्थं तदभून्नारी व्याप्त लोकत्रयं त्विषा ॥ १३॥

यदभू च्छाम्भवं तेजस् तेनाजायत तन्मुखम् ।
याम्येन चाभवन् केशा बाहवो विष्णु तेजसा ॥ १४॥

सौम्येन स्तनयो र्युग्मं मध्यं चैन्द्रेण चाभवत् ।
वारुणेन च जङ्घोरू नितम्ब स्तेजसा भुवः ॥ १५॥

ब्रह्मण स्तेजसा पादौ तदङ्गुल्योऽर्क तेजसा ।
वसूनां च कराङ्गुल्यः कौबेरेण च नासिका ॥ १६॥

तस्यास्तु दन्ताः सम्भूताः प्राजापत्येन तेजसा ।
नयन त्रितयं जज्ञे तथा पावक तेजसा ॥ १७॥

भ्रुवौ च सन्ध्ययो स्तेजः श्रवणा वनिलस्य च ।
अन्येषां चैव देवानां सम्भव स्तेजसां शिवा ॥ १८॥

ततः समस्त देवानां तेजोराशि समुद्भवाम् ।
तां विलोक्य मुदं प्रापुर् अमरा महिषार्दिताः ॥ १९॥

शूलं शूला द्विनिष्कृष्य ददौ तस्यै पिनाक धृक् ।
चक्रं च दत्तवान् कृष्णः समुत्पाध्य स्व चक्रतः ॥ २०॥

शङ्खं च वरुणः शक्तिं ददौ तस्यै हुताशनः ।
मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी ॥ २१॥

वज्रमिन्द्रः समुत्पाद्य कुलिशा दमराधिपः ।
ददौ तस्यै सहस्राक्षो घण्टा मैरावताद्गजात् ॥ २२॥

कालदण्डाद्यमो दण्डं पाशं चाम्बुपति र्ददौ ।
प्रजापति श्चाक्षमालां ददौ ब्रह्मा कमण्डलुम् ॥ २३॥

समस्त रोम कूपेषु निज रश्मीन् दिवाकरः ।
कालश्च दत्तवान् खड्गं तस्याश्चर्म च निर्मलम् ॥ २४॥

क्षीरोदश्चामलं हारं अजरे च तथाम्बरे ।
चूडामणिं तथा दिव्यं कुण्डले कटकानि च ॥ २५॥

अर्धचन्द्रं तथा शुभ्रं केयूरान् सर्व बाहुषु ।
नूपुरौ विमलौ तद्वद् ग्रैवेयक मनुत्तमम् ॥ २६॥

अङ्गुलीयक रत्नानि समस्ता स्वङ्गुलीषु च ।
विश्वकर्मा ददौ तस्यै परशुं चाति निर्मलम् ॥ २७॥

अस्त्राण्यनेक रूपाणि तथाभेद्यं च दंशनम् ।
अम्लान पङ्कजां मालां शिरस्युरसि चापराम् ॥ २८॥

अददज्जलधि स्तस्यै पङ्कजं चाति शोभनम् ।
हिमवान् वाहनं सिंहं रत्नानि विविधानि च ॥ २९॥

ददावशून्यं सुरया पानपात्रं धनाधिपः ।
शेषश्च सर्वनागेशो महामणि विभूषितम् ॥ ३०॥

नागहारं ददौ तस्यै धत्ते यः पृथिवी मिमाम् ।
अन्यैरपि सुरैर्देवी भूषणै रायुधैस्तथा ॥ ३१॥

सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ।
तस्या नादेन घोरेण कृत्स्न मापूरितं नभः ॥ ३२॥

अमायतातिमहता प्रतिशब्दो महानभूत् ।

चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे ॥ ३३॥

चचाल वसुधा चेलुः सकलाश्च महीधराः ।
जयेति देवाश्च मुदा तामूचुः सिंह वाहिनीम् ॥ ३४॥

तुष्टुवु र्मुनयश्चैनां भक्ति नम्रात्म मूर्तयः ।
दृष्ट्वा समस्तं सङ्क्षुब्धं त्रैलोक्य ममरारयः ॥ ३५॥

सन्नद्धाखिल सैन्यास्ते समुत्तस्थु रुदायुधाः ।
आः किमेत दिति क्रोधात् आभाष्य महिषासुरः ॥ ३६॥

अभ्यधावत तं शब्दं अशेषै रसुरै र्वृतः ।
स ददर्श ततो देवीं व्याप्त लोकत्रयां त्विषा ॥ ३७॥

पादाक्रान्त्या नतभुवं किरीटो ल्लिखिताम्बराम् ।
क्षोभिताशेष पातालां धनुर्ज्यानिः स्वनेन ताम् ॥ ३८॥

दिशो भुज सहस्रेण समन्ताद्व्याप्य संस्थिताम् ।
ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् ॥ ३९॥

शस्त्रास्त्रै र्बहुधा मुक्तैर् आदीपित दिगन्तरम् ।
महिषासुर सेनानीश् चिक्षु राख्यो महासुरः ॥ ४०॥

युयुधे चामरश्चान्यैश् चतुरङ्ग बलान्वितः ।
रथाना मयुतैः षड्भिर् उदग्राख्यो महासुरः ॥ ४१॥

अयुध्यता युतानां च सहस्रेण महाहनुः ।
पञ्चाशद्भिश्च नियुतैर् असिलोमा महासुरः ॥ ४२॥

अयुतानां शतैः षड्भिर् बाष्कलो युयुधे रणे ।
गजवाजि सहस्रौघैर् अनेकैः परिवारितः ॥ ४३॥

वृतो रथानां कोट्या च युद्धे तस्मिन्न युध्यत ।
बिडालाख्यो ऽयुतानां च पञ्चाशद्भि रथायुतैः ॥ ४४॥

युयुधे संयुगे तत्र रथानां परिवारितः ।
अन्ये च तत्रायुतशो रथनाग हयैर्वृताः ॥ ४५॥

युयुधुः संयुगे देव्या सह तत्र महासुराः ।
कोटिकोटि सहस्रैस्तु रथानां दन्तिनां तथा ॥ ४६॥

हयानां च वृतो युद्धे तत्राभून्महिषासुरः ।
तोमरै र्भिन्दि पालैश्च शक्तिभि र्मुसलैस्तथा ॥ ४७॥

युयुधुः संयुगे देव्या खड्गैः परशु पट्टिशैः ।
केचिच्च चिक्षिपुः शक्तीः केचित् पाशांस्तथापरे ॥ ४८॥

देवीं खड्ग प्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ।
सापि देवी ततस्तानि शस्त्रा ण्यस्त्राणि चण्डिका ॥ ४९॥

लीलयैव प्रचिच्छेद निज शस्त्रास्त्र वर्षिणी ।
अनाय स्तानना देवी स्तूयमाना सुरर्षिभिः ॥ ५०॥

मुमोचासुर देहेषु शस्त्रा ण्यस्त्राणि चेश्वरी ।
सोऽपि क्रुद्धो धुतसटो देव्या वाहन केसरी ॥ ५१॥

चचारासुर सैन्येषु वनेष्विव हुताशनः ।
निःश्वासान् मुमुचे यांश्च युध्यमाना रणेऽम्बिका ॥ ५२॥

त एव सद्यः सम्भूता गणाः शत सहस्रशः ।
युयुधुस्ते परशुभिर् भिन्दि पालासि पट्टिशैः ॥ ५३॥

नाशयन्तो ऽसुरगणान् देवी शक्त्युप बृंहिताः ।
अवादयन्त पटहान् गणाः शङ्खांस्तथापरे ॥ ५४॥

मृदङ्गांश्च तथैवान्ये तस्मिन् युद्ध महोत्सवे ।
ततो देवी त्रिशूलेन गदया शक्ति वृष्टिभिः ॥ ५५॥

खड्गादिभिश्च शतशो निजघान महासुरान् ।
पातयामास चैवान्यान् घण्टास्वन विमोहितान् ॥ ५६॥

असुरान् भुवि पाशेन बद्ध्वा चान्यान कर्षयत् ।
केचिद् द्विधा कृता स्तीक्ष्णैः खड्ग पातै स्तथापरे ॥ ५७॥

विपोथिता निपातेन गदया भुवि शेरते ।
वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः ॥ ५८॥

केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि ।

निरन्तराः शरौघेण कृताः केचिद्रणाजिरे ॥ ५९॥

श्येनानु कारिणः प्राणान् मुमुचु स्त्रिदशार्दनाः ।
केषाञ्चिद् बाहवश्छिन्नाश् छिन्न ग्रीवास्तथापरे ॥ ६०॥

शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ।
विच्छिन्न जङ्घास्त्वपरे पेतुरुर्व्यां महासुराः ॥ ६१॥

एकबाह्वक्षि चरणाः केचिद्देव्या द्विधाकृताः ।
छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः ॥ ६२॥

कबन्धा युयुधु र्देव्या गृहीत परमायुधाः ।
ननृतुश्चापरे तत्र युद्धे तूर्य लयाश्रिताः ॥ ६३॥

कबन्धाश्छिन्न शिरसः खड्ग शक्त्यृष्टि पाणयः ।
तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महासुराः ॥ ६४॥

पातितै रथनागाश्वैर् असुरैश्च वसुन्धरा ।
अगम्या साभवत्तत्र यत्राभूत् स महारणः ॥ ६५॥

शोणितौघा महानद्यः सद्यस्तत्र प्रसुस्रुवुः ।
मध्ये चासुर सैन्यस्य वारणासुर वाजिनाम् ॥ ६६॥

क्षणेन तन्महासैन्यं असुराणां तथाम्बिका ।
निन्ये क्षयं यथा वह्नि स्तृणदारु महाचयम् ॥ ६७॥

स च सिंहो महानादं उत्सृजन् धुतकेसरः ।
शरीरेभ्यो ऽमरारीणां असूनिव विचिन्वति ॥ ६८॥

देव्या गणैश्च तैस्तत्र कृतं युद्धं महासुरैः ।
यथैषां तुतुषुर्देवाः पुष्पवृष्टि मुचो दिवि ॥ ६९॥

॥ इति श्रीमार्कण्डेय पुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये महिषासुर सैन्य वधो नाम द्वितीयोऽध्यायः ॥ २॥